**जिच्चा**–जित्वा–पुनः पुनरभ्यासेन परिचितान् कृत्वा । उत्त० ८१ ।

**जिज्जूहइ**–निष्काश्यते । बृ० तृ० ४ ।

**जिज्झगारा**–तुन्नाकविशेषः, शिल्पार्यभेदः । प्रज्ञा० ५६ ।

**जिट्ठयं**–ज्येष्ठकं–अतिशयप्रशस्यमतिवृद्धं वा । उत्त० ४९० ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**जिट्ठा**–ज्येष्ठा–सुदर्शना, अनवद्याङ्गी । विशे० ६३५ । नि० चू० द्वि० ४६ अ ।

**जिट्ठामूले**–ज्येष्ठामूलः–ज्येष्ठः । उत्त० ५३७ ।

**जिणंतस्स**–जयतः–अभिभवतः । दश० १६० ।

**जिणंदासे**–जिनदासः–विपाकदशानां द्वितीयश्रुतस्कन्धे पञ्चममध्ययनम् । विपा० ८९ ।

**जिण**–जिनः–रागादिजेता । भग० ६७ । जयति–निराकरोति रागद्वेषादिरूपानरातीनिति जिनः । रागादिजयः । भग० ६ । रागादीनां जेता, यद्वा मनःपर्यवज्ञानी । जं० प्र० १३६ । जिनः–तीर्थङ्करः । आव० ६६२ । हिताप्त्यनिवर्त्तकयोगसिद्धो गणधारी । जीवा० ३ । हिताप्त्यनिवर्त्तकयोगः, हितप्रवृत्तगोत्रविशुद्धोपायाभिमुखापायविमुखादिको वा । गोत्रविशुद्धोपायाभुमुखहितप्रवृत्तादिभेदः । जीवा० ४ । जयति–निराकरोति रागद्वेषादिरूपानरातीनिति जिनः । सम० ४ । सयोगीकेवली । ठाणा० २०२ । विशिष्टश्रुतधरः, श्रुतजिनः अवधिजिनः, मनःपर्यायज्ञानजिनः, छद्मस्थवीतरागश्च । आव० ५०१ ।

**जिणइ**–जयति । आव० ५०२ ।

**जिणकप्पट्ठिति**–जिनाः–गच्छनिर्गतसाधुविशेषास्तेषां कल्पस्थितिः जिनकल्पस्थितिः । ठाणा० १६९. ३७४ ।

**जिणकप्पिय**–जिनकल्पिकः । आव० ३२३ ।

**जिणकप्पिया**–कल्पिकविशेषः । नि० चू० प्र० ३३८ आ ।

**जिणति**–जयति । आव० ३४२ ।

**जिणदत्त**–जिनदत्तः–चम्पायां सुश्रावकः । दश० ४७ । लोभोदाहरणे पाटलीपुत्रे श्रावकः । आव० ३९७ । परलोकनमस्कारफलविषये मथुरायां श्रावकः । आव०४५४ । इहलोके कायोत्सर्गफलमितिदृष्टान्ते श्रेष्ठी सुभद्रापिता । आव० ७९९ । चम्पायां सार्थवाहः । ज्ञाता० २०० ।

**जिणदत्तपुत्त**–चम्पायां सार्थवाहपुत्रः । ज्ञाता० ९१ ।

**जिणदासो**–जिनदासः–मनोगुप्तिदृष्टान्ते श्रेष्ठीसुतः श्रावकः । आव० ५७८ । महेश्वरविशेषः । आव० ३९६ । मथुरायां श्राद्धविशेषः । आव० १९७ । परलोकफलविषये कुलपुत्रमित्रम् । आव० ८६३ । रायपुरे श्रावकविशेषः । महाचन्द्राभिधकुमारस्य सुतः । विपा० ९५ ।

**जिणदेवो**–जिनदेवः–भावप्रणिधिविषये भृगुकच्छे आचार्यः । आव० ७१२ । आत्मदोषोपहारविषयेऽर्हन्मित्रश्रेष्ठिपुत्रः । आव० ७१४ । मूलगुणप्रत्याख्याने कोटीवर्षे श्रावकः । आव० ७१५ । सङ्गपरिहरणविषये चम्पायां सार्थवाहः श्रावकः । आव० ७२३ ।

**जिणधम्म**–कांचनपुरश्रेष्ठी यत्पृष्ठि स्थालीदग्धा द्विमासपर्यायः । मर० ।

**जिणपडिमा**–जिनप्रतिमा । जीवा० २२८ ।

**जिणपसत्थं**–जिनप्रशस्तं–जिनप्रशासितम् । प्रश्न० १४७ ।

**जिणपालिए**–चंपायां माकन्दीभद्रायाः पुत्रः । ज्ञाता० १५६ ।

**जिणमय**–जिनाः–तीर्थंकरास्तेषां आगमरूप प्रवचनम् । आव० ५८८ । आगमः । दश० २५५ ।

**जिणरक्खिरा**–चंपायां माकन्दीभद्रायाः पुत्रः । ज्ञाता० १५६ ।

**जिणलिंगं**–अचेलकत्वम् । बृ० तृ० ५५ आ ।

**जिणवयणं**–जिनवचनं–वाच्यवाचकयोरभेदोपचाराज्जिनवचनाभिहितमनुष्ठानम् । उत्त० ७०८ ।

**जिणवयणबाहिरो**–जिनवचनबाह्यः–यथावस्थितागमपरिज्ञानरहितः । आव० ५३३ ।

**जिणसकहा**–जिनसकथा–जिनसक्थीनि । जं० प्र० ५३३ ।

**जिणसकहाओ**–जिनसक्थीनि–जिनास्थिनि । भग० ५०५ । जिनसक्थीनि–तीर्थंकराणां मनुजलोकनिर्वृतानां सक्थीनि अस्थीनि । सम० ६४ ।

**जिणसासण**–जिनशासनं- जिनागमम् । उत्त० ८८ । जिनशासनं । क्रोधविपाकप्रतिपादकं वीतरागवचनम् । दश० २३२ ।

**जिणा**–रागद्वेषमोहान् जयन्तीति जिनाः–सर्वज्ञाः । ठाणा० १७४ । ये जिनकल्पं प्रतिपत्स्यन्ते ते जिनाः । बृ० प्र० २२९ आ । जिनकल्पिकाः । ओघ० २०८ । गच्छनिर्गताः साधुविशेषाः । बृ० तृ० २५१ अ ।

**जिणित्ता**–जित्वा । उत्त० ३१३ ।

**जिणियव्वं**–जेतव्ययम् । आव० ३४२ ।

**जिणियाइओ**–जितवान् । आव० ५०२ ।

**जिणुस्सेहो**–जिनोत्सेधः–जिनानां उत्कर्षतः पञ्चधनुः शतानि जघन्यतः सप्तहस्ताः । जीवा० २२८ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**जिण्णकूवो**–जीर्णकूपः । आव० १५२ ।
**जिण्णुज्जाणे**–जीर्णोद्यानम् । ज्ञाता० ७८ ।
**जितं**–परावर्त्तनं कुर्व्वतः परेण वा क्वचित् पृष्टस्य यच्छीघ्रमागच्छति तज्जितम् । अनु० १५ ।
**जितशत्रुः**–छत्रानगर्यां नृपः । आव० १७७ । मिथिलानगर्यां राजा । सूर्य० २ । सहसम्मत्यादिदृष्टान्ते वसन्तपुरे राजा । आचा० २१ ।
**जितसत्तू**–जितशत्रुः–पञ्चालजनपदे राजा काम्पिल्यनगरनायक इति । ठाणा० ४०१ । जितशत्रुः–भद्दिलपुराधिपतिः । अन्त० ४ । बृ० तृ० २३१ अ । जितशत्रुः–कौशाम्बीनृपतिः । उत्त० २८७ । चम्पायां नरपतिः । ज्ञाता० १७३ ।
**जितारो**–आनन्दपुरनगरे राजा । बृ० तृ० १०७ आ ।
**जितारीराया**–आनंदपुरे राया । नि० चू० द्वि० ४२ अ ।
**जिनकल्प**–साधुभेदविशेषः । विशे० १० ।
**जिनकल्पिकः**–साधुभेदविशेषः । भग० ४ ।
**जिनकल्पिकादिसमाचारः**–कल्पः । भग० ६१ ।
**जिनदत्तः**–आधासम्भवदृष्टान्ते सङ्कुलग्रामे श्रावकः । पिण्ड० ६३ ।
**जिनदासः**–आच्छेद्यद्वारविवरणे वसन्तपुरे श्रावकः । पिण्ड० १११ ।
**जिनप्रभसूरिः**–आचार्यविशेषः । जं० प्र० ५४३ ।
**जिनभद्र**– । विशे० १ ।
**जिनमतिः**–आधासम्भवदृष्टान्ते सङ्कुलग्रामे जिनदत्तभार्या । पिण्ड० ६३ ।
**जिनमुद्राः**–मुद्राभेदः । भग० १७४ ।
**जिनाः**–जिनकल्पिकादयः । ओघ० १६७ । गच्छनिर्गतसाधुविशेषाः । ठाणा० १६६ ।
**जिनेश्वरः**–अभयदेवसूरीणां गुरुः । औप० ११६ । ज्ञाता० २५४ ।
**जिब्भाडं**–अतीवगिद्धो । नि० चू० द्वि० १३५ आ ।
**जिब्भिदिए**–जिव्हेन्द्रियम् । प्रज्ञा० २६३ ।
**जिब्भिआ**–जिह्विका, प्रणाला । जं० प्र० २६१ ।
**जिमित**–जिमत् । आव० ३५३ ।
**जिम्मइ**–जिम्यते । आव० १५० ।
**जिम्ह**–माया । व्य० प्र० २४६ आ ।
**जिम्ह**–लज्जनीयं । नि० चू० प्र० २६६ अ । बृ० द्वि० ७३ आ । परवञ्चनाभिप्रायेण । भग० ५७३ । जिह्माः । ठाणा० २७० । जैम्हम् । सम० ७१ ।
**जिम्हजढ**–मायारहितः । व्य० प्र० २४६ आ ।
**जियंतए**–हरितविशेषः । प्रज्ञा० ३३ ।
**जिय**–जीतव्यवहारः । उत्त० ६४ । जितं–परिचितम् । विशे० ६३५ । जितं–द्रुतमागच्छति । विशे० ४०५ ।
**जियकप्प**–जीतकल्पः–जिनप्रतिबोधनलक्षणः आचरितकल्पः ठाणा० ४६३ । नि० चू० तृ० १०२ अ ।
**जियपडिमं**– । नि० चू० प्र० २४३ आ ।
**जियपडिमा**–जीवप्रतिमा । आव० ६६८ ।
**जियसत्तु**–द्वितीयतीर्थङ्करस्य पितृनाम । सम० १५० । जितशत्रुः–राजा । आव० ३७२ । मिथिलायां नृपतिः । जं० प्र० ६ । शिक्षायोगदृष्टान्ते प्रत्यन्तनगराधिपतिः । आव० ६७८ । इहलोके कायोत्सर्गफलमितिदृष्टान्ते वसन्तपुरेऽधिपतिः । आव० ७६६ । क्षितिप्रतिष्ठितनगरस्य राजा । पिण्ड० ३० । जितशत्रुर्नाम नरपतिः । व्य० प्र० १८८ आ । श्रावस्त्यां नगर्यां राजा राज० ११६ । वाणिजग्रामनगरे राजा । उपा० १ । खितिपतिट्ठियनयरे राया । नि० चू० तृ० ६८ आ । नि० चू० प्र० ३५६ आ । सावत्थिनयरे राया । बृ० द्वि० १५२ आ । वणवासीनगरीए राया । बृ० तृ० ११३ आ । जितशत्रुः चम्पानगर्यामधिपतिः । उत्त० ६२ । ज्ञाता० १६३ । अचलपुरेनृपतिः । उत्त० १०० । श्रावस्तिनगर्यां राजा । उत्त० ११४ । मथुरायां नृपतिः । आव० ३६८ । उत्त० १२० । उत्त० १४८ । उज्जयिन्यां नृपतिः । उत्त० १६२, २१३ । सर्वतोभद्रनगराधिपतिः । विपा० ६८ । नृपतिः । विपा० ६५ । वसन्तपुरे नृपतिः । आव० ३७२, ३७८, ३६३ । ओघ० १५८ । जितशत्रुः–लोहार्गलराजधान्या राजा । आव० २१० । तुरुमिणीनगर्यां राजा । आव० ३६६ । मृगकोष्ठकनगरे राजा । आव० ३६१ । पाटलीपुत्रे राजा । आव० ३६७ । स्पर्शेन्द्रियदृष्टान्ते वसन्तपुरे राजा । आव० ४०२ । शिल्पसिद्धदृष्टान्ते पाटलिपुत्रे राजा । आव० ४०६ । परलोके नम-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

स्कारफलविषये वसन्तपुरनगरे राजा। आव० ४५३। योगसंग्रहे शिक्षादृष्टान्ते क्षितिप्रतिष्ठितनगरे राजा। आव० ६७०। तितिक्षोदाहरणे मथुरायामधिपतिः। आव० ७०२। आत्मसंयमविराधनादृष्टान्ते क्षितिप्रतिष्ठितनगरेऽधिपतिः। आव० ७३२। राजाभियोगविषये हस्तिनागपुरनृपतिः। आव० ८११। गुणोदाहरणे पाटलिपुत्रे राजा। आव० ८१६। द्रव्यातङ्कोदाहरणे राजगृहे राजा। आचा० ७५। पश्चालाधिपती। ज्ञाता० १२४। आम्लकल्पायां नरपतिः। ज्ञाता० २४८।

**जियसत्तूराया-** । नि० चू० प्र० २१८ आ।

**जिया-**जिता-अभ्यस्ता उचिता वा अनुष्ठीयमाना। आव० ५६४।

**जियारी-**सम्भवजिनपिता। सम० १५०। जितारिः-सम्भवपिता। आव० १६१।

**जिवंतगाणं-** । भग० ८०२।

**जिवसंथव-**जिनसंस्तवः 'लोगस्सुज्जोअगरे' इत्यादिरूपः। दश० १८०।

**जिव्हा-**रसना। आचा० ३८।

**जीअं-**जीतं-कल्पः, आचारः। जं० प्र० १५६। कल्पः। जं० प्र० २५२।

**जीअलोगं-**जीवलोकं-वर्तमानभवादन्यं भवं पृथिवीकायिकादिकं, अपमृत्युं प्राप्नुतेत्यर्थः। जं० प्र० २४६।

**जीए-**प्रभूतानेकगीतार्थकृता मर्यादा तत्प्रतिपादको ग्रन्थोऽप्युचारात् जीतम्। व्य० प्र० ५ अ। जीतः-व्यवहारः। व्य० द्वि० ३६३।

**जीतं-**स्थितिः कल्पो मर्यादा ( सूत्र ) व्यवस्था च। नंदी० ४६। भग० ३८४। द्रव्यक्षेत्रकालभावपुरुषप्रतिषेवानुवृत्त्या संहननधृत्यादिपरिहाणिमवेक्ष्य यत्प्रायश्चित्तदानं यो वा यत्र गच्छे सूत्रातिरिक्तः कारणतः प्रायश्चित्तव्यवहारः प्रवर्त्तितो बहुभिरन्यैश्चानुवर्त्तितस्तज्जीतमिति। ठाणा० ३१८।

**जीभुमणा-**गुच्छाविशेषः। प्रज्ञा० ३२।

**जीमूत-**जीमूतः-बलाहकः। जीवा० १८६। ठाणा० २७०। जीमूतः-प्रावट्प्रारम्भसमयभावीजलभृतः, बलाहकः। प्रज्ञा० ३६०।

**जीयंति-**जीयन्ते-हार्यन्ते। उत्त० २७८।

**जीय-**जीवितं-श्रुतं, मर्यादा, सवानुचीर्णम्। विशे० ५०७। जीतं-दुष्टनिग्रहविषयमाचरितम्। प्रश्न० ५८। जीतं-जीवितं, अवश्यं, अव्यवच्छित्तिनयाभिप्रायतः सूत्रमेव वा। आव० ६८। जीवः-जीवितं, जीतं-कल्पतः। प्रश्न० १३।

**जीयदंडो-**जीतदण्डः-रूढदण्डः, जीवदण्डो वा-जीवितनिग्रहलक्षणः। प्रश्न० ५८।

**जीया-**जीवा-प्रत्यञ्चा। ज्ञाता० २२२।

**जीरंतो-**जीर्यन्। आव० ५६६।

**जीरकं-**रसविशेषः। सूर्य० २९३। हरितकविशेषः। २९३।

**जीरा-** । भग० ८०२।

**जीरु-**साधारणबादरवनस्पतिकायविशेषः। प्रज्ञा० ३४।

**जीर्णः-**हानिगतदेहः। भग० ७०५।

**जीर्णकर्पटः-**कुचेलः। औप० ७४।

**जीवंजीवगसउणे-** । भग० ६२७।

**जीवंजीवा-**चर्मपक्षिविशेषः। प्रज्ञा० ४९।

**जीवजीवेण-**जीवजीवेन-जीवबलेन गच्छति न शरीरबलेनेत्यर्थः। भग० २१६। ज्ञाता० ७६। जीववीर्येण न तु शरीरवीर्येणेत्यर्थः। अनुत्त० ७।

**जीवंजीवेन-**जीवबलेन न शरीरबलेनेत्यर्थः। अन्त० २७।

**जीवंजीवो-**चर्मपक्षिविशेषः। जीवा० ४१।

**जीवंतिया-**अजीविष्यत्। आव० ३६८।

**जीव-**उपयोगः। विशे० ८८७। आयुःप्राणादिमान्। अनु० २४२। जीवितवान् जीवति जीविष्यति चेति जीवः-प्राणधारणधर्मा आत्मा। ठाणा १६। जीवसामान्यम्। जीवनिति प्राणान् धारयनित्यर्थः। जीवनपर्यायविशिष्टः। जीवा० १४०। प्राणो भूतः सत्त्वो विज्ञो वेदयिता। भग० १९२। जीवा-प्रत्यञ्चा। जं० प्र० २०१। प्राणधारणम्। ठाणा० ११६। जीतम्। व्य० द्वि० ३६३ आ। जीवः। भग० २२९। ज्ञानाद्युपयोगः। भग० ३२५। जीवाः-गर्भव्युत्क्रान्तिकसम्मूर्च्छनजौपपातिकपंचेन्द्रियाः। आचा० ७१।

**जीवअजीवमीसग-**जीवाजीवमिश्रा-सत्यामृषाभाषाभेदः।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

दश० २०६ ।

**जीवअपच्चक्खाणकिरिया**-जीवविषये प्रत्याख्यानाभावेन यो बन्धादिर्व्यापारः सा जीवाप्रत्याख्यानक्रिया ।ठाणा०४१।

**जीवआरंभिया**-यज्जीवानारभमाणस्य-उपमृग्दतः कर्मबन्धनं सा जीवारम्भिकी । ठाणा ४१ ।

**जीवइ**-गुच्छाविशेषः । प्रज्ञा० ३२ ।

**जीवकप्पो**-बहुशोऽनेकवारं प्रवृत्तः महाजनेन वानुवर्त्तित एष पञ्चमको जीतकल्पः । व्य० द्वि० ४४१ अ ।

**जीवकिरिया**-जीवस्य क्रिया-व्यापारो जीवक्रिया । ठाणा० ४० ।

**जीवगाहो**-जीवग्राहम् । उत्त० ५१ ।

**जीवग्गाहो गिण्हंति**-जीवतीति जीवस्तं जीवन्तं गृह्णन्ति । ज्ञाता० ८७ ।

**जीवघणो**-जीवघनः-निचितीभूतजीवप्रदेशरूपः । प्रज्ञा० ६१० ।

**जीवजढं**-आहाकम्म । बृ० द्वि० १०६ अ ।

**जीवजीवक**-जीवजीवकः-पक्षिविशेषः । प्रश्न० ८ ।

**जीवणं**-जीवनं-तथैवाजन्मापि प्रवृत्तिः । प्रश्न० १०६ ।

**जीवदय**-जीवनं जीवो भावप्राणधारणममरणधर्मत्वमित्यर्थस्तं दयत इति जीवदयो, जीवेषु वा दयः यस्य स जीवदयः । सम० ४ ।

**जीवदिट्ठिया**-अश्वादिदर्शनार्थं गच्छतः या सा जीवदृष्टिका । ठाणा० ४२ ।

**जीवनं**-स्थितिः-आयुः कर्मानुभूतिरिति । प्रज० १६६ ।

**जीवनिव्वत्ती**-निर्वर्त्तनं निर्वृत्तिर्निष्पत्तिर्जीवस्यैकेन्द्रियादि तया निर्वृत्तिः जीवनिर्वृत्तिः । भग० ७७२ ।

**जीवनेसत्थिया**-राजादिसमादेशाद्यदुदकस्य यन्त्रादिभिर्निसर्जनं सा जीवनैसृष्टिकी । ठाणा० ४३ ।

**जीवपएसा**-जीवः प्रदेशा एव येषां ते जीवप्रदेशाः । ठाणां ४१० । जीवः-प्रदेश एवैको येषां मतेन ते जीवप्रदेशाः । औप० १०६ ।

**जीवपतेसिता**-जीवः प्रदेश एव येषां ते जीवप्रदेशास्त एव जीवप्रादेशिकाः, अथवा जीवप्रदेशो जीवाभ्युपगतो विद्यते येषां ते, चरमप्रदेशजीवप्ररूपिणः । ठाणा ४१० ।

**जीवपरिणामे**-जीवस्य-परिणामो जीवपरिणामः । प्रज्ञा० २८४ ।

**जीवपाउसिया**-जीवे प्रद्वेषाज्जीवप्राद्वेषिकी । ठाणा०४१ ।

**जीवपाओगिअं**-जीवप्रायोगिकं जीवप्रयोगेन निर्वृत्तं प्रायोगिकप्रथमभेदः । आव० ४५७ ।

**जीवपाओसिया**-जीवस्य-आत्मपरतदुभयरूपस्योपरि प्रद्वेषाद् या क्रिया प्रद्वेषकरणमेव वा जीवप्रद्वेषिका । भग० १८२ ।

**जीवपारिग्गहिया**-जीवान् परिगृह्णाति जीवपारिग्रहिकी, पारिग्रहिकी क्रियायाः प्रथमो भेदः । आव० ६१२ ।

**जीवप्रदेशाः**-निह्नवाश्चरमप्रदेशजीवपरूपिण इति हृदयम् । विशे० ६३३ ।

**जीवफुडा**-जीवेन स्पृष्टानि-व्याप्तानि जीवस्पृष्टानि । ठाणा० २५२ ।

**जीवभावं**-जीवभावः-जीवत्वं, चैतन्यम् । भग० १४६ ।

**जीवमीसए**-जीवविषयं मिश्रं सत्यासत्यं जीवमिश्रम् । ठाणा० ४६० ।

**जीवमीसग**-जीवमिश्रा सत्यामृषाभाषाभेदः । दश० २०६ ।

**जीवमीस्सिया**-प्रभूतानां जीवतां स्तोकानां च मृतानां शङ्खशङ्खनकादीनामेकत्र राशौ दृष्टे यदा कश्चिदेवं वदति अहो ! महान् जीवराशिरयमिति तदा सा जीवमिश्रिता । प्रज्ञा० २५६ ।

**जीवलोग**-जीवलोकं-ब्रह्माण्डम् । जं० प्र० २०६ । जीवलोकः-जीवाधारः-क्षेत्रम् । प्रश्न० ११५ ।

**जीवविप्पजढं**-आत्मना विप्रमुक्तम् । ज्ञाता० ८५, १६८ ।

**जीववेयारणिया**-जीवं विदारयति-स्फोटयतीति, अथवा जीवं-पुरुषं वितारयति-प्रतारयति वञ्चयतीत्यर्थः । ठाणा० ४३ ।

**जीवसामंतोवणिवाइया**-जीवसामन्तोपनिपातिकी- समन्तादनुपततीति सामन्तोपनिपातिकीक्रिया, तस्याः प्रथमो भेदः । आव० ६१३ ।

**जीवसाहत्थिया**-यत् स्वहस्तगृहीतेन जीवेन जीवं मारयति सा जीवस्वाहस्तिकी । ठाणा० ४२ ।

**जीवा**-जीविता इत्यर्थः । व्य० द्वि० १६२ अ । प्राणधारणम् । उपा० ४ । जीवाः-जीवन्ति जीविष्यन्ति जीवितवन्त इति । अनु० ७४ । पञ्चेन्द्रियाः । ज्ञाता० ६१ ।



Jain Education International 2010_05　For Private & Personal Use Only　www.jainelibrary.org

प्रज्ञा० १०७। ठाणा० १३६। जं० प्र० ५३९। जीवन्ति जीविष्यन्ति अजीविषुरिति जीवाः-नारकतिर्यग्नरामरा लक्षणाश्चतुर्गतिकाः। आचा० १७६। प्रत्यञ्चा-दवरिकेत्यर्थः। सूर्य० २१, २३३। उत्त० ३११। जीवा-ऋज्वी सर्वान्तिमप्रदेशपङ्क्तिः। जं० प्र० ६८।

**जीवाओ**-जम्बूद्वीपलक्षणवृत्तक्षेत्रस्य वर्षाणां वर्षधाराणां ऋज्वीसीमा जीवोच्यते। सम० ४३।

**जीवाजीवमिस्सिया**-मृतजीवत्तिजीवराशौ एतावन्तोऽत्र जीवन्त एतावन्तोऽत्र मृता इति नियमेनावधारयतो विसंवादे जीवाजीवमिश्रिता। प्रज्ञा० २५६।

**जीवाजीवमीसए**-जीवाजीवविषयं मिश्रकं जीवाजीवमिश्रकम्। ठाणा० ४९०।

**जीवाजीवविभत्ति**-जीवाजीवविभक्तिः-उत्तराध्ययनेषु षट्त्रिंशत्तममध्ययनम्। उत्त० ९।

**जीवाजीवविभत्ती**-उत्तराध्ययनेषु षट्त्रिंशत्तममध्ययनम्। सम० ६४।

**जीवानां**-संयमजीवितेन जीवतां जिजीविषूणां च। आचा० २५६।

**जीवाभिगमे**-जीवानां ज्ञेयानां अवध्यादिनैवाभिगमो जीवाभिगमः। ठाणा० १३३।

**जीविआरिहं**-जीविताहँ-आजीविकायोग्यम्। जं०प्र० १८८।

**जीविऊसविए**-जीवितमुत्सूते-प्रसूति इति जीवितोत्सवः स एव जीवितोत्सविकः। जीवितविषये वा उत्सवो-महः स इव यः स जीवितोत्सविकः। भग० ४६८।

**जीविए**-असंयमजीवितः। उत्त० २९६। आचा० १०७, १२३। यद्यस्य स्वकार्य साधनं प्रति समर्थ रूपं तत्तस्य जीवितमिति रूढम्। उत्त० २२९।

**जीवियंतकरणो**-जीवितान्तकरणः प्राणवधस्य द्वाविंशतितमः पर्यायः। प्रश्न० ६।

**जीविय**-असंयमाख्यः। आचा० २५१। जीवितम्-कर्मणो दीर्घा स्थितिः। भग० २८९। जीविकायै। उत्त० ४७८।

**जीवियकारणं**-जीवितकारणं-असंयमजीवितहेतुः। दश० ९६।

**जीवियकिच्छ**-कृच्छ्रजीविता। बृ० तृ० २४२ अ।

**जीवियरसहे**-साधारण बादर वनस्पतिकायविशेषः। प्रज्ञा० ३४।

**जीवियववरोवणं**-जीवितव्यपरोपणम्। ओघ० १५६।

**जीवाया**-जीवस्य-देहस्य सम्बन्धी अधिष्ठातृत्वादात्मा जीवात्मा पुरुषः, जीवात्मा तु सर्वभेदानुगामि जीवद्रव्यं, जीवस्यैव स्वरूपम्। भग० ७२४।

**जीवियाइओ**-जीवितवान्। बृ० २८ अ।

**जीवियारिहं**-आजन्मनिर्वाह्योग्यम्। ज्ञाता० २४।

**जीवियासंसप्पओगे**-जीवितं-प्राणधारणं तत्राभिलाषप्रयोगः-यदि बहुकालं जीवेयमिति जीविताशंसाप्रयोगः। आव० ८३९।

**जीवे**-जीवेत्-अविकृत आस्ते। सूत्र० २७८। जीविते। ठाणां ५२०।

**जीवेजीवे**-जीवेजीवे-इह एकेन जीव शब्देन जीव एव गृह्यते द्वितीयेन च चैतन्यम्। भग० २८५।

**जीवो**-जीवनं जीवः-भावप्राणधारणं, अमरणधर्मत्वमित्यर्थः। औप० १५।

**जीहा**-जिह्वा-रसना। जीवा० २७३।

**जुंगमच्छा**-मत्स्यविशेषः। प्रज्ञा० ४४।

**जुंगिओ**-जात्यङ्गहीनः। ठाणा० १६५।

**जुंगियंग**-जुङ्गिताङ्गं-कर्त्तितहस्तपादाद्यवयवः। पिण्ड० १३१। व्यङ्गितः। ठाणा० ३४२।

**जुंजकं**-तृणविशेषः। जीवा० २६।

**जुंजणाकरणं**-योजनाकरणं मनःप्रभृतीनां व्यापारकृतिः। आव० ४६६।

**जुंजुंति**-युञ्जन्ति-परिसमापयन्ति। सूर्य० १७२।

**जुंजुकं**-तृणविशेषः। उत्त० ६९२।

**जुंजे**-युज्यात्-सङ्घट्टयेत्। उत्त० ५४।

**जुअ**- । नि० चू० प्र० १४८ अ।

**जुअणद्धे**-युगनद्धः-युगमिव नद्धो-योगः, यथा युगं वृषभस्कन्धयोरारोपितं वर्तते तद्वत् योगोऽपि यः प्रतिभाति स युगनद्ध इत्युच्यते। सूर्य० २३३।

**जुअल**-युगलं-सजातीयविजातिययोर्लतयोर्द्वन्द्वम्। जं०प्र० २५।

**जुआणा**-जुवाणा। नि० चू० प्र० २५८ अ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**जुइ**-युतिः, मेलः । जं० प्र० १९२ ।
**जुई**-युक्तिः इष्टपरिवारादियोगः । उपा० २६ । शरीरगता आभरणगता च । जीवा० २१७ । युतिः-इष्टार्थसंयोगः । भग० १३२ । शरीराभरणाश्रिता । सूर्य० २५८ । विवक्षितार्थयोगः । औप० ५० । शरीराभरणविषया । सूर्य० २८६ । प्रज्ञा० ६०० । द्युतिः-आन्तरं तेजः । ज्ञाता० १४० ।
**जुइए**-आभरणादिसम्बन्धिन्या युक्त्या वा उचितेषु वस्तुघटना लक्षणया । विपा० ८६ । द्युतिः-शरीरगता आभरणगता च । जं० प्र० ६२ । द्युतिः-दीप्तिः शरीराभरणादिसम्पत् तस्याः-युतिर्वा इष्टपरिवारादिसंयोगलक्षणा तस्याः । जं० प्र० २०२ ।
**जुउ**-पृथक् । नि० चू० प्र० २४३ अ ।
**जुए**-युगं-पञ्चसंवत्सरमानम् । भग० २११ ।
**जुगंतरं**-यूपप्रमाणभूभागः युगान्तरं । प्रश्न० ११० ।
**जुगं**-बदिल्लाणखंधे आरोविज्जति । नि० चू० प्र० ११७ आ । युगं-यूपः । भग० १४० । प्रश्न० ८१ । विपा० ३७ । सुषमदुष्षमादिकालः । जीवा० १२१ । युगम् । आव० ३४५ । चन्द्रादिसंवत्सरपञ्चात्मकम् । सूर्य० ९१ । युगः-कालः । व्य० प्र० २५६ आ । शरीरम् । दश० चू० ७४ । चतुर्हस्तम् । अनु० १५४ । पञ्चसंवत्सरिकम् । जं० प्र० ९१, ४९५ । पञ्चसंवत्सरम् । जीवा० ३४४ । सम० ९८ । भग० ८८८ । यूपः । ठाणा० ४५० । युगानि पञ्चवर्षमानानि कालविशेषाः । लोकप्रसिद्धानि वा कृतयुगादीनि । पट्टपद्धतिपुरुषाः । जं० प्र० १५५ ।
**जुगपहाण**- । नि० चू० प्र० ९ आ ।
**जुगप्पहाण**-युगप्रधानः । आव० ३०२ । नि० चू० प्र० ३४० अ ।
**जुगबाहु**-सुविधिनाथस्य पूर्वभवनाम । सम० १५१ ।
**जुगबाहू**-युगबाहुः-महाविदेहे तीर्थकरः । विपा० ९४ । सत्यो( । शौचो । )दाहरणे वासुदेवः । आव० ७०६ ।
**जुगमच्छो**-युगमत्स्यः, मत्स्यविशेषः । जीवा० ३६ ।
**जुगमाया**-युगमात्रा दृष्टिः । भग० ७५४ ।
**जुगयं**-पृथक् । दश० ४७ ।
**जुगलं**-युगलं-द्वन्द्वम् । जीवा० १९९ । सजातीयविजातीययोर्लतयोर्द्वन्द्वम् । जीवा० १८२ ।
**जुगलजीहो**-युग्मजिह्वः-आत्मोत्कर्षपराभिभवजिह्वाद्वययुक्तः । आव० ५६६ ।
**जुगवं**-युगं-कालविशेषः तत्प्रशस्तमस्यास्तीति युगवान् । उपा० ४६ । युगं-सुषमादुष्षमादिकालः स स्वेन रूपेण यस्यास्ति न दोषदुष्टः स युगवान् । राज० २२ । युगं-सुषमदुष्षमादिकालः सोऽदुष्टो निरुपद्रवो विशिष्टबलहेतुर्यस्यास्त्यसौ युगवान् । अनु० १७५ ।
**जुगसंवच्छरे**-पञ्चसंवत्सरात्मकं युगं तदेकभूदेशभूतो वक्ष्यमाणलक्षणश्चन्द्रादिर्युगसंवत्सरः । ठाणा० ३४४ । युगं-पञ्चवर्षात्मकं तत्पूरकः संवत्सरो युगसंवत्सरः । सूर्य० १५३ ।
**जुगसन्निभ**-युगसन्निभः-वृत्ततया आयततया च यूपतुल्यः । जीवा० २७१ ।
**जुगाति**-युगानि-पञ्चसंवत्सराणि । ठाणा ८६ ।
**जुगुछितो**-कोलिगजातिभेदो । नि० चू० द्वि० ४३ आ ।
**जुगुप्सना**-परिस्थापना । उत्त० ४७८ ।
**जुगुप्समानः**-निन्दन्परिहरन् । आचा० ११४ ।
**जुगुप्से**-निन्दामि । आव० ४५६ ।
**जुगुप्सितानि**-चर्मकारकुलादीनि । आचा० ३२७ ।
**जुगेइ**-षण्णवतिरङ्गुलानि युगम् । जं० प्र० ९४ ।
**जुग्ग**-युग्यं-गोल्लविषयप्रसिद्धं द्विहस्तप्रमाणं वेदिकोपशोभितं जम्पानम् । औप० ४ । जीवा १८९ । गोल्लविषयप्रसिद्धं द्विहस्तप्रमाणं चतुरस्रवेदिकोपशोभितं जम्पानम् । जीवा० २८१ । अनु० १५१ । पुरुषोत्क्षिप्तमाकाशयानम् । सूत्र० ३३० । वाहनं, गोल्लदेशप्रसिद्धजम्पानविशेषः । प्रश्न० ९१ । वाहनमात्रं, गोल्लकदेशप्रसिद्धो वा जम्पानविशेषः । प्रश्न० १५२ । वाहनं-गोल्लदेशप्रसिद्धं वा जम्पानम् । भग० ५४७ । प्रश्न० १६१ । योग्यं-सर्वोपाधिशुद्धम् । अनुरूपम् । आव० ४७० । समनुरूपम् । आव० ५२४ । युग्यं-गोल्लविषय प्रसिद्धं जम्पानं द्विहस्तप्रमाणं वेदिकोपशोभितम् । भग० १८७ । गन्त्रिकादि । आचा० ६० । युग्यं पुरुषोत्क्षिप्तमाकाशयानं जम्पानमित्यर्थः । जं० प्र० १२३ । युग्यानि-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

गोल्लविषयप्रसिद्धानि द्विहस्तप्रमाणानि चतुरस्रवेदिकायुतानि जम्पानानि । जं० प्र० ३० ।

**जुग्गछिड्डं**–युगछिद्रम् । आव० ३४५ ।

**जुग्गायरिय**–युग्यस्य चर्या वहनं गमनमित्यर्थः । युग्याचार्यः । ठाणा० २४० ।

**जुज्जसि**–युज्यसे–अर्हसि । ज्ञाता० १६७ ।

**जुण्णंतेपुरं**–ण्हसिय जोव्वणाओ अपरिभुज्जमाणीओ अच्छंति एयं जुण्णंतेपुरं । नि० चू० प्र० २७१ आ ।

**जुण्णकुमारी**–शरीरजरणाद् वृद्धा सैव जीर्णत्वापरिणत्वाभ्यां जीर्णकुमारी । ज्ञाता० २५० ।

**जुण्णथेरी**–जीर्णस्थविरा । आव० ३४२ ।

**जुण्णा**–जीर्णा–चिरकालप्रव्रजिता । व्य० प्र० २४८ । जूर्णाः–जीर्णाः । ओघ० ७१ । स्थविरा । बृ० द्वि० २५४ आ । जीर्णा–शरीरजरणाद्वृद्धेत्यर्थः । ज्ञाता० २५० ।

**जुण्णो**–जीर्णः । आव० १०१ ।

**जुत्त**–धर्माविरुद्धम् । नि० चू० प्र० ३२७ अ । युक्तम् । भग० ३२२ । ओघ० १४१ । परस्परसम्बन्धः । भग० १६४ । थोवं । नि० चू० प्र० २२० अ । युक्तः–युक्त्युपपन्नः । सूत्र० ७ । देशकालोपपन्नः । सूर्य० २६४ । सेवकगुणोपेततयोचितः । परस्परं बद्धो न तु बृहदन्तरालः । जीवा० २६० । ज्ञाता० १८५ ।

**जुत्तगती**–मिदुगती न शीघ्रं गच्छतीति । नि० चू० तृ० ३८ अ ।

**जुत्तपालिया**–युक्तपालिकाः–निरन्तरमण्डलीकाः । भग० १६४ । युक्ताः–सेवकगुणोपेततयोचिताः, परस्परं बद्धा न तु बृहदन्तराला पालिर्येषां ते युक्तपालिकाः । जीवा० २६० ।

**जुत्तफुसिएणं**–उचितबिन्दुपातेन । सम० ६१ ।

**जुत्ति**–युक्तिः–मीलनम् । जं० प्र० १०० ।

**जुत्तिलेवो**–युक्तिलेपः । बृ० प्र० ८२ अ ।

**जुत्तिसेणं**–एरवते अष्टमः तीर्थंकरनाम । सम० १५३ ।

**जुत्ती**–युक्तिः–मीलनम् । युक्तिसुवर्णम् । दश० २६३ । जीवा० २६५ । योजनं–समविषमविभागनीतिर्वा । उत्त० ३० । चतुर्थवर्गस्य षष्ठमध्ययनम् । निरय० ३९ ।

**जुत्तीया**–युक्त्या आकाशसंयोगेन । ज्ञाता० २७० ।

**जुद्धंगं**–युद्धाङ्गम् । उत्त० १४३ । यानावरणप्रहरणयुद्धकुशलत्व नीतिदक्षत्वव्यवसायशरीरारोग्यरूपम् । उत्त० १४३ ।

**जुद्ध**–युद्धं–बाहुयुद्धादिकं लावकादीनां वा तत् । आव० १२९ । अड्डियपच्छड्डियादिकरणेहिं जुद्धं । नि० चू० द्वि० ७१ अ । युद्धं कुर्कुटानामिव । जं० प्र० १३९ । युद्धं–आयुधयुद्धम् । ज्ञाता० २२० ।

**जुद्धणिजुद्धं**–पुव्वं जुद्धेण जुद्धिउं पच्छा संधी विक्खोहिज्जति जत्थ तं जुद्धणिजुद्धं । नि० चू० द्वि० ७१ अ ।

**जुद्धमहे**– । नि० चू० प्र० ३४४ आ ।

**जुद्धसज्जा**–युद्धसज्जाः युद्धप्रागुणाः । ज्ञाता० ५९ ।

**जुद्धातिजुद्धं**–युद्धातियुद्धं–खड्गादिप्रक्षेपपूर्वकं महायुद्धं यत्र प्रतिद्वन्द्विहतानां पुरुषाणां पातः स्यात् । जं० प्र० १३९ ।

**जुद्धिक्कओ**–युद्धीयः । आव० ७१९ ।

**जुन्नइत्तो**–जीर्णवान् । आव० ४१८ ।

**जुन्ना**–जीर्णा इव जीर्णाः । ज्ञाता० १७२ । जूर्णानि पुराणानि । ओघ० १३८ ।

**जुमलपदानि**– । बृ० प्र० ६६ ।

**जुम्मपएसिए**–समसङ्ख्यप्रदेशनिष्पन्नम् । भग० ८६१ ।

**जुम्मपएसे**–समसङ्ख्यप्रदेशः । भग० ८६० ।

**जुम्मा**–सञ्ज्ञाशब्दत्वाद्राशिविशेषाः । भग० ८७३ । गणितपरिभाषया समो–राशियुग्मम् । भग० ७४४ ।

**जुम्मो**–युग्मः–समः । सूर्य० १५६ ।

**जुयंतकरभूमी**–इह युगानि–कालमानविशेषास्तानि च क्रमवर्त्तीनि तत्साधर्म्याद्ये क्रमवर्त्तिनो गुरुशिष्यप्रशिष्यादिरूपाः पुरुषास्तेऽपि युगानि तैः प्रमिताऽन्तकरभूमिः युगान्तकरभूमिः । ज्ञाता० १५४ ।

**जुय**–यूपः–युगम् । प्रश्न० ८ ।

**जुयगं**–पृथक् । आव० ७६९, ८१३ ।

**जुयगो**–सन्ध्याप्रभाचन्द्रप्रभयोर्मिश्रत्वमिति भावः । ठाणा० ४७९ ।

**जुययं**–घरं कथां सा सूणंत्ति । दश० चू० २३ ।

**जुयलं**–युगलं–बालवृद्धरूपम् । बृ० द्वि० १०० अ । युगलं । आव० ३०५ । युगलं–द्वयम् । ज्ञाता० २२१ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**जुवरज्जं**–जुवरायाणां णाभिसिंचति ताव तं । नि० चू० द्वि० ११ अ ।
**जुवराइ**–युवराजः । आव० ७०२ ।
**जुवराए**–अनभिषिक्तयुवराजपदं राज्यम् । नाभिषिक्तो राजा । बृ० द्वि० ८२ अ ।
**जुवराय**–युवराजः–राज्यचिन्ताकारी राजप्रतिशरीरम् । प्रज्ञा० ३२७ । उत्थिताशनः । जीवा० २८० ।
**जुवराया**–आस्थानिकामध्यगतः सन् कार्याणि प्रेक्षते चिन्तयति स युवराजः । व्य० प्र० १६६ आ ।
**जुवलं**–बालवुड्ढा । नि० चू० प्र० १०१ आ ।
**जुवलगं**–युग्मम् । आव० ४२३ ।
**जुवलय**–युगलम् । आव० ३४१ । युगलतया तत्तरूणां संजातत्वेन युगलितम् । भग० ३७ । युगलितया स्थितः । औप० ७ ।
**जुवाणो**–युवा–यौवनस्थः प्राप्तवया एष इत्येवं अणति–व्यपदिशति लोको यमसौ निरुक्तिवशात् युवानः । अनु० १७७ ।
**जुसिए**–प्रीते । ठाणां० ३४२ ।
**जुसिय**–जूषितः–क्षपितः । भग० १२७ ।
**जुहि**–युधि । आव० ४०७ ।
**जुहिगपुप्फा**–पुष्पविशेषः । नि० चू० द्वि० १४१ आ ।
**जुहिट्ठिलो**–युधिष्ठिरः । आव० ३६५ ।
**जुहिट्ठिल्ल**–युधिष्ठिरः । ज्ञाता० २०८ ।
**जुहुणामि**–जुहोमि–अन्येभ्यो ददामि । ठाणा० ३८१ ।
**जुहोमि**–आसेवाम्यनुतिष्ठामि । ठाणा० ३८२ ।
**जूइगारो**–द्युतकारः । उत्त० २१८ ।
**जूईकरा**–द्यूतकराः । प्रश्न० ४६ ।
**जूए**–यूपः–द्विपृष्ठवासुदेवनिदानकारणम् । आव० १६३ । भग० २७५ ।
**जूतं**–द्यूतम् । आव० ३४२ ।
**जूतिकरो**–द्यूतकारः । आव० ४२१ ।
**जूय**–द्यूतम् । आव० ५०२ । द्यूतम् । उत्त० १४७ । यूपः–यज्ञस्तम्भः । जं० प्र० १८३ । यूपः–युगम् । प्रश्न० ५६ ।
**जूयए**–सन्ध्याप्रभा चन्द्रप्रभा च यद्युगपद् भवतस्तत् । ठाणा० ७६ ।
**जूयक**–पातालकलशविशेषः । ठाणा० ४८० ।
**जूयखलयं**– । विपा० ५२ ।
**जूयखलयाणि**–द्यूतखलकानि–द्यूतस्थण्डिलानि । ज्ञाता० ८१ ।
**जूयगो**–यूपकः । जीवा० २८३ ।
**जूयपसंगी**–द्यूतप्रसङ्गी–द्यूतासक्तः । ज्ञाता० ८१ ।
**जूयस्सवि**– । सम० ८७ ।
**जूया**–पासंतादी । नि० चू० द्वि० ७१ अ । त्रीन्द्रियजन्तुविशेषः । प्रज्ञा० ४२ । यूका–अष्टलिक्षाप्रमाणा । भग० २७५ ।
**जूयारो**–द्यूतकारः । आव० ४१७ ।
**जूरणं**–वयोहानिरूपम् । सूत्र० ३६८ ।
**जूरति**–जूरयति–गर्हति । सूत्र० ३२५ ।
**जूरह**–कदर्थयथ । सूत्र० ९७ ।
**जूरावणा**–शोकातिरेकाच्छरीरजीर्णता प्रापणा । भग० १८४ ।
**जूवए**–पातालकलशविशेषः । ठाणा० २२६ ।
**जूवगो**–यूपकः–सन्ध्याप्रभा चन्द्रप्रभा च येन युगपद्भवतः, अमोघो वा । आव० ७३५ । संज्झप्पभा चंदप्पभा य जेण जुगवं भवंति तेण जुवगो । नि० चू० तृ० ७० अ ।
**जूवय**–जुवयं णाम चीडं, पाणियपरिक्खित्तं । नि० चू० तृ० १९ अ । शुक्लपक्षे प्रतिपदादिदिनत्रयं यावद्यैः सन्ध्याछेदा आव्रीयन्ते ते यूपकाः । भग० १९६ ।
**जूस**–जूषो–मुद्गतन्दुलजीरककटुभाण्डादिरसः । ठाणा० ११८ प्रश्न० १६३ । जूषः । ओघ० ६७ । यूषः–मुद्गतण्डुल जीरककटुभाण्डादिरसः । सूर्य० २९३ ।
**जूसणा**–जोषणा–सेवा तल्लक्षणधर्म इत्यर्थः । ठाणा० ५७ । जोषणा सेवानालक्षणो यो धर्मः । ठाणा० २३७ । सेवा । भग० १२७ । क्षपणा–सेवना । सूत्र० ४२१ ।
**जूसिते**–जुष्टः–सेवितः, क्षपितः । ठाणा० २३७ ।
**जूसिया**–सेविताः–तद्युक्ताः । ठाणा० ५७ ।
**जूह**–युथः–वानरादिसम्बन्धिः । ज्ञाता० ३६ ।
**जूहवई**–युथपतिः तत्स्वामी । ज्ञाता० ६७ ।
**जूहवतित्तं**–यूथपतित्वम् । आव० ३४८ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**जूहाहिवती**-यूथस्य-गवां समूहस्याधिपतिः-स्वामी यूथाधिपतिः । उत्त० ३४६ । यूथस्य-साध्वादिसमूहस्याधिपतिः-आचार्यपदवीं गतः यूथाधिपतिः । उत्त० ३४६ ।

**जूहिआगुम्मा**-यूथिकागुल्माः । जं० प्र० ६८ ।

**जूहिया**-गुल्मविशेषः । प्रज्ञा० ३२ ।

**जूहियापुडा**- । ज्ञाता० २३२ ।

**जे**-इति निपातोऽलङ्कारार्थः । विशे० २५१ । वाक्यालङ्कारार्थः । विशे० १२१० । निपातः । प्रश्न० १२४, १२८, १४१ । पादपूर्तों । आव० ६१७ । निपातः सर्वत्र पूरणे । उत्त० ४५७ ।

**जेट्ठ**-ज्येष्ठ इति प्रथमः । सूर्य० ४ । परियायजाइसुण घेत्तव्वो, सुणेत्ताण जो गहणधारणाजुत्तो समत्ते वक्खाणे जो भासती, पडिभणतीत्यर्थः सो जेट्ठो । नि० चू० तृ० ८१ अ ।

**जेट्ठमहाजण**-जेष्ठार्यसमुदायः । बृ० प्र० २३८ आ ।

**जेट्ठा**-षोडशो नक्षत्रः । ठाणा० ७७ । ज्येष्ठा-स्वामिदुहिता । आव० २५५, ३१२ । शिक्षायोगदृष्टान्ते हैहयकुलसम्भूतवैशालिकचेटकपञ्चमी पुत्री । आव०६७६ ।

**जेट्ठानक्खत्ते**-ज्येष्ठानक्षत्रम् । सूर्य० १३० ।

**जेट्ठामूल**-जेष्ठा मूलं वा नक्षत्रं पौर्णमास्यां यत्र स्यात् स जेष्ठामूलः जेष्ठ इति । औप० ६५ । जेष्ठः । ज्ञाता० ६७ ।

**जेट्ठामोली**-ज्येष्ठामोली । सूर्य० ११६ ।

**जेट्ठोग्गहो**-ठवणा । वासावासासु चत्तारि मासा तम्हा उदुबद्धियाओ वासे उग्गहो जेट्ठो भवति । नि० चू० प्र० ३३६ आ ।

**जेण**-यया । उत्त० १३४ ।

**जेणेव**-येनेति यस्मिन्नित्यर्थे । सूर्य० ६ ।

**जेमण**-जेमनम् । ओघ० १६३ । जेमनानि वटकपूरणादीनि । उपा० ५ ।

**जेमणिगा**-भोजनम् । नि० चू० द्वि० १०७ अ ।

**जेमामणं**- । भग० ५४४ ।

**जेमेंतो**-जेमन् । आव० ३०३ ।

**जेमेइ**-समारचयति । उप० मा० गा ३५८ ।

**जेया**-जितः । आव० १५७ ।

**ज्येष्ठानुज्येष्ठः**- । विशे० ४४३ ।

**जोइ**-ज्योतिः-शरावाद्याधारो ज्वलन्नग्निः । नंदी० ८४ । ज्योतिः-अग्निः । सम० १८ । भग० ३१३ । दश० ११७ । वन्हिः । भग० ३०७ । देवविशेषाणामालयः । आव० १८४ ।

**जोइक्कं**-ज्योतिष्कं-ज्योतिश्चक्रम् । जीवा० १७५ । ज्योतिष्कदेवविमानरूपम् । सूर्य० २७४ ।

**जोइक्खं**-ज्योतिः । आव० ६२१ । ज्योतिष्कम् । आव० ८४५ । ज्योतिष्कस्पर्शः । ओघ० २०४ ।

**जोइक्खे**-दीपः । छाइह्लयं दीवं मुणेज्जाहि । व्य० द्वि० २५४ अ ।

**जोइजसा**-ज्योतिर्यशा-आर्जवोदाहरणे वत्सपालिका । आव० ७०४ ।

**जोइयं**-दृष्टम् । आव० ५६१ । अवलोकितम् । दश० ६६ ।

**जोइरसा**-ज्योतिरसं नाम रत्नम् । जं० प्र० २३ । ज्ञाता० ३४ ।

**जोइस**-ज्योतिषं-ज्योतिश्चक्रम् । सम० २१ । प्रश्न० ६५ । जीवा० ३७७ । नक्षत्रचन्द्रयोगादिज्ञानोपायशास्त्रम् । प्रश्न० १०६ । ज्योतिषदेवविमानरूपम् । जीवा० ३३६ । ज्योत्स्नः-शुक्लः । जीवा० ३३६ । ज्योतिः-चन्द्रः । उत्त० १५० । ज्योतिष्कशब्देन तारकाः । प्रश्न० १६ । नवमशतके ज्योतिष्कविषयो द्वितीय उद्देशः । भग० ४२५ । ज्योतिः-अग्निः । जं० प्र० ७४ । द्योतयन्तीति ज्योतींषि विमानानि । उत्त० ७०१ ।

**जोइसामयणं**-ज्योतिषामयनं-ज्योतिःशास्त्रम् । औप० ६३ ।

**जोइसि**-ज्योतींषि-विमानानि । देवाः सूर्यादयः । प्रज्ञा० ७० । ज्योतींषि ज्योतिष्का देवास्त एव ज्योतिषिकाः । जं० प्र० १०३ ।

**जोइसिअ**-ज्योतिषिकः-सूर्यः । जं० प्र० १०३ ।

**जोइसिआ**-ज्योतिष्काः-द्योतयन्ति-प्रकाशयन्ति जगदिति ज्योतींषि विमानानि, तेषु भवा ज्योतिष्काः । यद्वा द्योतयन्ति-शिरोमुकुटोपगूहिभिः प्रभामण्डलकल्पैः सूर्यादिमण्डलैः प्रकाशयन्तीति ज्योतिषो-देवाः सूर्यादयः । प्रज्ञा० ६६ । ज्योतिषिका नाम द्रुमगणाः । जं० प्र० १०३ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**जोइसियउद्देसए-** । भग० ५०५ ।

**जोइसिया**–ज्योतिषिकः–द्रुमविशेषः । जीवा० २६७ ।

**जोई**–योगः–धर्मशुक्लध्यानलक्षणः स येषां विद्यत इति योगिनः साधवः । आव० ५८२ । योगिनः–अध्यात्मशास्त्रानुष्ठायिनः । औप० ६१ ।

**जोईरसं**–ज्योतीरसं–रत्नविशेषः । जीवा० १८० ।

**जोईसर**–योगेश्वरः–युञ्जयन्त इति योगाः–मनोवाक्काय व्यापारलक्षणास्तैरीश्वरः–प्रधानः । आव० ५८२ । योगीश्वरः–युज्यते वाऽनेन केवलज्ञानादिना आत्मेति योगः–धर्मशुक्लध्यानलक्षणः स येषां विद्यत इति योगिनः–साधवस्तैरीश्वरः । आव० ५८२ । योगिस्मर्यः–योगिचिन्त्यः योगिध्येयो वा । आव० ५८२ ।

**जोएइ**–( देशी० ) निरूपयति । व्य० प्र० २० आ ।

**जोएति**–पश्यति । नि० चू० प्र० २०५ आ ।

**जोएमि**–गवेषयामि । नि० चू० प्र० १७८ अ ।

**जोएह**–पश्यत । आव० ६८ । पश्य । ओघ० १६१ ।

**जोक्कारो**–जोत्कारः । आव० ६० ।

**जोगंधरायणो**–योगन्धरायणः, शिक्षायोगदृष्टान्ते प्रद्योतराज्ञो मन्त्री । आव० ६७४ ।

**जोग**–योगः–सम्बन्धः । उपायोपेयभावलक्षणः । अवसरलक्षणः । योग्यः । ठाणा० १ । योगो–लब्धस्य परिपालनम् । ज्ञाता० १०३ । सम्बन्धः–अवसरः । जं० प्र० ३ । योगोऽत्र शरीरजीवव्यापारः । विशे० २१० । योगः–सामर्थ्यम् । दश० २३१ । वशीकरणादि । दश० २३६ । सम्बन्धः । प्रज्ञा० २५८ । ठाणा० ४८६ । व्यापारः । नि०चू० प्र० ६१ अ । जोगः–आकाशगमनादिफलो द्रव्यसङ्घातः । पिण्ड० २१ । योगः–अन्तःकरणादिः । दश० १७ । बीजाधानोद्भेदपोषणकरणम् । जीवा० २५५ । क्षीराश्रवादीलब्धिकलापसम्बन्धः । सूत्र० ७ । दिग्योगः । जं० प्र० ४६६ । मिथ्यात्वादिः । आव० ४७८ । द्रव्योपचारः । आव० ५६६ । मनोवाक्कायव्यापारलक्षणः धर्मशुक्लध्यानलक्षणो वा । आव० ५८२ । औदारिकादिशरीरसंयोगसमुत्थ आत्मपरिणामविशेषव्यापारः । आव० ५८३ । ज्ञानादिभावनाव्यापारः, सत्त्वसूत्रतपःप्रभृतिर्वा । आव० ५९३ । मनःप्रभृति । आव० ६०७ । प्रत्युपेक्षणादिरूपसंयमयोगः । पिण्ड० १६७ । भावाध्ययनचिन्तनादिशुभव्यापारः । उत्त० ८ । मनोवाक्कायव्यापारः । प्रज्ञा० ३८२ । योजनं योगः–आत्मकर्मसम्बन्धः, आत्मनश्चलनस्पन्दनादिक्रियया सम्यगाधानं योजनं योगः सकर्मक आत्मव्यापारः । विशे० १३१८ । किरिया । नि० चू० प्र० ७६ आ । दो घयपला मधुपलं दहियस्स य आढयं मिरियवासा खंडगुलदभागासडसालूनि च, विद्देसणवसीकरणाणि वा । दश० चू० १२६ । श्रुताध्ययननिबन्धनतपोविशेषः । बृ० प्र० ११८ अ ।

**जोगच्छेयपलिभागा**–योगः–मनोवाक्कायविषयं वीर्यं तस्य केवलिप्रज्ञाच्छेदेन प्रतिविशिष्टा निर्विभागा भागाः योगच्छेदप्रतिभागाः । अनु० २४० ।

**जोगजुंजणा**–योगयोजनाः–वशीकरणादि योगाः । प्रज्ञा० ६५ ।

**जोगजुत्तया**–योगयुक्तता–संयमयोगयुक्तता । पंचविंशतितमोऽनगारगुणः । आव० ६६० ।

**जोगधूवधूविओ**–योगधूपधूपितः । आव० ११६ ।

**जोगपरिवुड्ढी**–योगपरिवृद्धिः–अभिगृहीतेतरतपसोर्वद्धिः । बृ० तृ० १५० अ ।

**जोगपरिव्वाइया**–योगपरिव्राजिका–समाधिप्रधानव्रतिनीविशेषः । ज्ञाता० १५८ ।

**जोगभूमी**–विरायणजोगभूमीए वि जे केति दिवसा सेसा जोगभूमयन्तो भण्णति । नि० चू० प्र० १६७ आ ।

**जोगवड्ढी**–जाव दिणे दिणे आहारेओ जोगवड्ढीए इमा जोगवड्ढी । नि० चू० प्र० ३४२ अ ।

**जोगवहणं**–योगवहनम् । दश० १०८ ।

**जोगवाही**–योगवाही । आव० ८५४ ।

**जोगविही**–योगविधिः । ओघ० १७८ ।

**जोगसंगहा**–युज्यन्त इति योगाः–मनोवाक्कायव्यापाराः, ते चाशुभप्रतिक्रमणात्प्रशस्ता एव गृह्यन्ते, तेषां शिष्याचार्यगतानामालोचनानिरपलापादिना प्रकारेण सङ्ग्रहणानि योगसङ्ग्रहाः । आव० ६६३ । योगानां प्रशस्तव्यापाराणां सङ्ग्रहाः योगसङ्ग्रहाः । प्रश्न० १४६ । योगसङ्ग्रहः । दश० १०७ । योगसङ्ग्रहः–मनोवाक्कायव्यापारसङ्ग्रहः । आव० ६६३ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**जोगसंलीणया**–योगसंलीनता–अपसत्थाण निरोहो जोगाणमुदीरणं च कुसलाणं । कज्जंमि य विहिगमणं जोए संलीणया भणिआ ॥१॥ दश० २९ । मनोयोगादीनामकुशलानां निरोधः–कुशलानामुदीरणमित्येवंभूता योगसंलीनता । दश० २९ ।

**जोगसच्च**–योगसत्यं नाम छत्रयोगाच्छत्री दण्डयोगाद्दण्डीत्येवमादि । दश० २०९ ।

**जोगसच्चा**–पर्याप्तिकसत्यभाषाया नवमो भेदः । योगः सम्बन्धः तस्मात् सत्या योगसत्या । प्रज्ञा० २५६ ।

**जोगहाणी**–योगहानिः–प्रत्युपेक्षणादिरूपसंयमयोगभ्रंशः । पिण्ड० १६७ ।

**जोगहीणं**–योगहीनं–योगरहितं–सम्यगकृतयोगोपचारम् । आव० ७३१ ।

**जोगा**–योगाः–आवश्यकव्यापाराः । बृ० तृ० १४६ आ । दुगमादिदव्वनियरा विद्देसणवसीकरणउच्छादण रोगावणयणकरा व जोगा । नि० चू० द्वि० ४४ अ । योगाः–वशीकरणादिप्रयोजनाः । प्रश्न० ११६ ।

**जोगाणुजोगे**–वशीकरणादियोगाभिधायकानि हरमेखलादिशास्त्राणि । सम० ४९ ।

**जोगाणुभावजणियं**–योगानुभावजनितं–मनोयोगादिगुणप्रभवम् । आव० ५९८ ।

**जोगियं**–यौगिकं–यदेतेषामेव द्वयादिसंयोगवत् । प्रश्न० ११७ ।

**जोगी**–वेज्जो । नि० चू० द्वि० १३९ अ ।

**जोग्गं**–युग्यं–गोल्लदेशप्रसिद्धो द्विहस्तप्रमाणो वेदिकोपशोभितो जम्पानविशेषः । प्रश्न० ८ ।

**जोग्गा**–योग्या-मण्डलीकरणाभ्यासः । जं० प्र० २३५ । योग्या । पिण्ड० ३३ । गुणनिका । औप० ६५ ।

**जोणए**–जोनकः–म्लेच्छविशेषः । जं० प्र० २२० ।

**जोणगं**–योनकम् । आव० १४७ ।

**जोणगा**– । आव० १४८ ।

**जोणि**–योनिः–गर्भनिर्गमनद्वारम् । भग० २९८, ४९६ ।

**जोणिप्पमुहं**–योनिप्रमुखं–योनिप्रवाहम् । जीवा० ३७२ ।

**जोणिब्भूए**–योनिभूतं– अविध्वस्तयोनि, प्ररोहसमर्थम् । दश० १४० ।

**जोणिविहाण**–योनिविधानं–योनिप्राभृतम् । विशे० ७५० ।

**जोणिसूल**–योनिशूलम् । भग० १९७ ।

**जोणी**–योनिः–प्रज्ञापनाया नवमं पदम् । प्रज्ञा० ६ । युवन्ति तैजसकार्मणशरीरवन्तः सन्त औदारिकादिशरीरप्रायोग्यपुद्गलस्कन्धसमुदायेन मिश्रीभवन्त्यस्यामिति योनिः–उत्पत्तिस्थानम् । प्रज्ञा० २२५ । उप्फत्तिट्ठाणं । नि० चू० प्र० ५६ आ । योनिः–यौति- मिश्रीभवति कार्मणशरीरिण औदारिकादि शरीरैरस्यां, जन्तवो जुषन्ते सेवन्त इति वा । उत्त० १८३ ।

**जोणीओ**–यौति- मिश्रीभवत्यौदारिकादिशरीरवर्गणापुद्गलैरसुमान् यस्यां ता योनयः–प्राणिनामुत्परिस्थानानि । आचा० २४ ।

**जोणीपमुहं**–योनिप्रमुखं–योनिप्रवाहम् । जीवा० १३४ ।

**जोणीपयं**–योनिपदं–प्रज्ञापनायां नवमं पदम् । भग० ४९६ ।

**जोणीपोसगो**–योनिपोषकः । आव० ८३० ।

**जोणीसंगहे**–योनिः–उत्पत्तिहेतुर्जीवस्य तया सङ्ग्रह–अनेकेषामेकशब्दाभिलाप्यत्वं योनिसङ्ग्रहः । भग० ३०३ । योन्या सङ्ग्रहणं योनिसङ्ग्रहो योन्युपलक्षितं ग्रहणम् । जीवा० १३३ ।

**जोण्हा**–ज्योत्स्ना–चन्द्रिका । ज्ञाता० १६१ ।

**जोण्हिया**–चिलातदेशोत्पन्नम्लेच्छविशेषः । भग० ४६० ।

**जोण्हे**–ज्योत्स्नः–शुक्लपक्षः । सूर्य० १४९ । शुक्लः । सूर्य० १७९ ।

**जोति**–ज्योतिः–अग्निः । सौम्यप्रकाशः । ठाणा० ५१७ ।

**जोतिरसे**–ज्योतिरसकाण्डं–ज्योतरसाणां विशिष्टो भूभागः । जीवा० ८९ ।

**जोतिष्मती**–तैलविधानोपयोगे वनस्पतिविशेषः । आव० ६१ ।

**जोतिसामयणे**–ज्योतिषामयनं- ज्योतिःशास्त्रम् । भग० ११२ ।

**जोती**–उद्दित्तं । नि० चू० प्र० ४८ अ ।

**जोत्तं**–योत्रम् । सूत्र० ३१२ । योक्त्रं–यूपे वृषभसंयमनम् । प्रश्न० १६४ । योक्त्रं–कण्ठबन्धनरज्जू । उपा० ४४ ।

**जोत्तयं**–योक्त्रकम् । जं० प्र० ५२७ ।

**जोनकनामकदेशजाः**–जोनिवयः । जं० प्र० १९१ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**जोनिक्यः**–जोनकनामकदेशजः । जं० प्र० १६१ ।

**जोयइ**–योजयति । आव० ६५४ ।

**जोयण**–चत्वारि गव्यूतानि योजनम् । अनु० १५६ । जीवा० ४० । भग० २७५ । प्रज्ञा० ४८ ।

**जोयणणीहारि**–योजननिर्हारि–योजनव्यापि । आव० २३४, २३७ ।

**जोयणनीहारिणा सरेण**–योजनातिक्रामिणा शब्देन ।उपा० २८ ।

**जोयणनीहारी**–योजनातिक्रमी स्वर इति । सम० ६२ ।

**जोयसा**–सतिसामत्थो, जं पमाणं भणितं तो पमाण उणहाणमहि वा । दश० चू० १२१ ।

**जोयाविया**–दर्शिताः । बृ० प्र० ५७ अ ।

**जोवणं**–शकटे गवादेर्योजनम् । बृ० द्वि० ५० अ । धान्यप्रकारः । ओघ० ७५ ।

**जोव्वण**–यौवनम् । आव० ५६६ । **यौवनं**–तारुण्यम् । ज्ञाता० २२० । परमस्तरुणिमा । प्रज्ञा० ५५१ ।

**जोसेमाणे**–जुषन्–आचरन् । आचा० २६५ ।

**जोह**–योधः–अतिशयशौर्यवान् । भग० ११५ ।

**जोहा**–योधाः–भटेभ्यो विशिष्टतराः सहस्रयोधादयः । औप० २७ ।

**जोहारो**–जुहारः–जयोत्कारः । आव० १०१ ।

**जोहिट्ठिल्लो**–युधिष्ठिरः–पाण्डवपञ्चकानां मध्ये ज्येष्ठः । अन्त० १५ ।

**ज्झ**–ध्याननिर्देशे । आव० ४४९ ।

**ज्झवणा**–क्षपणा । विशे० ४५० ।

**ज्झामि**–ध्यामं–ध्यामलीकृतं–आपादितपर्यायान्तरमित्यर्थः। भग० २१३ ।

**ज्झामिय**–ध्यानमितं–श्यामीकृतम् । भग० २१३ ।

**ज्झुक्खुरं**–शाखा । आव० ५१३ ।

**ज्झूसिय**–सेवितं–शोषितम् । भग० ११३ ।

**ज्ञप्तिः**–ज्ञापनं–ज्ञानम् । जं० प्र० ४ ।

**ज्ञा**–संवित्तिः । आव० २८२ ।

**ज्ञातं**–उदाहरणम् । नंदी० २३० । अध्ययनम् । प्रश्न० २ ।

**ज्ञातपुत्रीयम्**–महावीरसम्बन्धि । आचा० ४६ ।

**ज्ञाताः**–महावीरशान्तिजिनपूर्वजाः । ठाणा० ३५८ ।

**ज्ञातिः**–लोकैषणाबुद्धिः । आचा० १८० ।

**ज्ञान**–चेतना । आव० २४ । सम० १३५ ।

**ज्ञाननयः**– । दश० ८० ।

**ज्ञानपिण्डो**–ज्ञानं स्फातिं नीयते येन । ओघ० १४७ ।

**ज्ञानविसंवादयोगः**–अकालस्वाध्यायादिना । आव० ५८० ।

**ज्ञानशुद्धं**–यस्मिन् काले यत्प्रत्याख्यानं मूलगुणेषूत्तरगुणेषु वा कर्तव्यं भवति तत् जानाति तज्ज्ञानशुद्धम् । ठाणा० ३५० ।

**ज्ञानसंज्ञा**–संज्ञाभेदः । जीवा० १५ ।

**ज्ञानोपसम्पत्**–सूत्रार्थयोः पूर्वगृहीतयोः स्थिरीकरणार्थं तथा विस्रुटितसन्धानार्थं तथा प्रथमतो ग्रहणार्थमुपसम्पद्यते । ठाणा० ५०१ । आव० २७० ।

**ज्ञापकम**–अनुमानम् । नंदी० १६५ ।

**ज्येष्ठामूले**–ज्येष्ठमास इत्यर्थः । ओघ० १५६ ।

**ज्येष्ठो**– । विशे० ४४३ ।

**ज्योतिः**–नक्षत्रः । ठाणा० ६६ । उद्योतः । ओघ० २०१ ।

**ज्वलनप्रभनागाधिप**– । जं० प्र० २२३ ।

## झ

**झंख**–झषः–वारंवारं जल्प । पिण्ड० ६२ ।

**झंझकरे**–येन येन गणस्य भेदो भवति तत्तत्करो, येन वा गणस्य मनोदुःखं समुत्पद्यते तद्भाषी, अष्टादशमसमाधिस्थानम् । सम० ३७ । झञ्झाकरः–येन येन गणस्य भेदो भवति तत्तत्करी, येन च गणस्य मनोदुःखमुत्पद्यते तद्भाषी । प्रश्न० १२५ ।

**झंझकारी**–झञ्झकारी–यो येन येन गणस्य भेदो भवति सर्वो वा गणो झञ्झितो वर्त्तते तादृशं भाषते करोति वा । अष्टादशमसमाधिस्थानम् । आव० ६५५ ।

**झंझडिया**–झंझडिया–रिणे अदिज्जंते वणिएहिं अणेगप्पकारेंहि दुव्वयणेहिं झडिया । नि० चू० द्वि० ४३ अ । झंझडिया–लतकसादिएहिं वा झडिता । नि० चू० द्वि० ४३ अ ।

**झंझविओ**–झञ्झितः–उद्विग्नः । आव० ६५५ ।

**झंझा**–झञ्झा–कलहः । आव० ६६२ । तृष्णा । सूत्र० ३२६ । क्रोधो माया वा । सूत्र० २३५ । माया लोभेच्छा वा । आचा० २१० । कलहः । बृ० द्वि० १६ अ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

विप्रकीर्णा कोपविशेषाद्वचनपद्धतिः, अणत्थयबहुप्पलावित्तं। भग० ६२४ ।

**झंझाए**-व्याकुलितमतिर्भवेत्, व्याकुलतां परित्यजेत् । आचा० १७० ।

**झंझाकारित्वम्**-गणस्य चित्तभेदकारित्वं मनोदुःखकारिवचनभाषित्वं वा । अष्टादशमसमाधिस्थानम् । पञ्चमाधर्मद्वारेऽष्टादशमसमाधिस्थानम् । प्रश्न० १४४ ।

**झंझावाए**-झञ्झावातः-यः सवृष्टिको वातः, अशुभनिष्ठुरो वा । जीवा० २९ । झञ्झावातः-सवृष्टिरशुभनिष्ठुरः । प्रज्ञा० ३० ।

**झंझावाया**-झञ्झावाताः-अशुभनिष्ठुरा वाताः । भग० १९६ ।

**झंपित्ता**-झंपयित्वा-अनिष्टवचनावकाशं कृत्वा। सम०५३।

**झगिति**-झटिति कृत्वा । भग० १७५ ।

**झडिज्झति**-क्लिश्यति । आव० २९२ ।

**झडित्ति**-झटिति । आव० ६९० ।

**झडियंगा**-क्षपिताङ्गः । मर० ।

**झडुरविडुरं**-कण्डलविण्टलादि । व्य० प्र० २४६ ।

**झत्ति**-झटितीकृत्वा । भग० १७५ । झटिति । उत्त० २२३ ।

**झय**-ध्वजाः-सिंहगरुडादिरूपकोपलक्षिता बृहत्पट्टरूपा । जं० प्र० १८८ । ज्ञाता० २० ।

**झयसंठिओ**-ध्वजसंस्थितः । जीवा० २७९ ।

**झया**-ध्वजा-गरुडादिध्वजा । प्रश्न० ४८ । विपा० ४६ ।

**झरंति**-स्वाध्यायं कुर्वन्ति । बृ० द्वि० १७६ अ ।

**झरए**-झरति-परावर्तयति । व्य० द्वि० १०८ आ ।

**झरओ**-स्मारकः । आव० ३०७ ।

**झरित**-क्षरितः-पतितः । ओघ० २२२ ।

**झरिय**-स्थितसारः । व्य० प्र० २५७ । ज्ञातं निश्चितम् । मर० ।

**झलज्झला**-उदकशब्दविशेषः । ओघ० १६७ ।

**झल्लरि**-झल्लरी-चर्मावनद्धा विस्तीर्णा वलयाकारा । राज० २५, ४९ । झल्लरिः-वलयाकारो वाद्यविशेषः । भग० २१७ । झल्लरी-चतुरङ्गुलनालिः करटीसदृशी वलयाकारा । जं० प्र० १९२ । अल्पोच्छ्रया महामुखा चर्म्मावनद्धा । भग० ४७६ ।

**झल्लरी**-वलयाकारा । ओप० ७३ । चर्मावनद्धविस्तीर्णवलयाकारा आतोद्यविशेषरूपा । प्रज्ञा० ५४२ । चर्मावनद्धा विस्तीर्णवलयाकारा । जीवा० १०५ । चर्मावनद्धा विस्तीर्णा वलयरूपा । जीवा० २४५ । चर्मावनद्धा विस्तीर्णवलयाकारा आतोद्यविशेषरूपा । नंदी० ८८ । चर्मावनद्धा विस्तीर्णवलयाकारा आतोद्यविशेषः । आव० ४१ । उभयतो विस्तीर्णचर्मावनद्धमुखो मध्ये संकीर्णो ढक्कालक्षणाऽऽतोद्यविशेषो झल्लरी । विशे० ३५३ ।

**झल्लरीसंठिय**-झल्लरीसंस्थितः-आवलिकाबाह्यस्य विंशतितमं संस्थानम् । जीवा० १०४ ।

**झवंति**-विध्यापयन्ति । बृ० द्वि० १२ अ ।

**झविया**-क्षपिता-निर्मूलिताः । उत्त० ४३८ ।

**झस**-झषः-मत्स्यः । ज्ञाता० १९८ । अरुणशिखेनाहतोऽनशनी मत्स्यः । मर० । झषः-मत्स्यविशेषः । प्रश्न० ७ । जीवा० २७० ।

**झसोदरो**-झषो-मत्स्यस्तदुदरमिव तदाकारतयोदरं यस्या सौ झषोदरः । उत्त० ४९० ।

**झाइ**-ध्यायति-प्रज्वलयति । बृ० तृ० २०१ अ ।

**झाएज्ज**-प्रज्वलेत् । बृ० द्वि० ११३ आ ।

**झाटनं**-इह तीर्थे षण्मासान्तमेव तपस्ततः षण्णां मासानुपरियानू मासानापन्नोऽपराधी तेषां क्षपणं-अनोरोपणं, प्रस्थे चतुःसेतिकाऽतिरिक्तधान्यस्येव । ठाणा० ३२६ ।

**झाटयन्**-प्रस्फोटनं कारयनू । ठाणा० ३२९ ।

**झाणं**-अभ्यन्तरतपभेदः । भग० ९२२ । ध्यानं-एकाग्रतया करणम् । बृ० द्वि० १४७ आ । ध्यानं-दृढमध्यवसानं, एकाग्रस्य चिन्तानिरोधश्च । दश० चू० १४ । ध्यातिर्ध्यानमिति भावसाधनः । आव० ५८१ । चित्तनिरोधलक्षणं धर्मध्यानाधिकम् । सूत्र० १७५ । चित्तनिरोधरूपम् । प्रश्न० १०७ । चित्तनिरोधः । प्रश्न० १२८ । एकाग्रतालक्षणम् । आर्त्तरौद्रधर्म्मशुक्लाभिधानकम् । प्रश्न० १४३ ।

**झाणंतरिआ**-अन्तरस्य-विच्छेदस्य करणमन्तरिका, अथवा अन्तरमेवान्तर्यं, ध्यानस्यान्तरिका ध्यानान्तरिका-आरब्धध्यानस्य समाप्तिरपूर्वस्यानारम्भणम् । जं० प्र० १५० ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**झाणंतरिया**–ध्यानान्तरिका । आव० २२७ । आरब्ध-ध्यानस्य समाप्तिरपूर्वस्यानारम्भणम् । जं० प्र० १५१ । अन्तरस्य, विच्छेदस्य करणमन्तरिका ध्यानस्यान्तरिका ध्यानान्तरिका–आरब्धध्यानस्य समाप्तिरपूर्वस्यानारम्भण-मित्यर्थः । भग० २२१ ।

**झाणकोट्ठोवगय**– । आचा० ४२४ ।

**झाणणिग्गहो**–ध्याननिग्रहः । उत्त० ३३२ ।

**झाणसंताणो**–ध्यानसन्तानः–ध्यानप्रवाहः । आव० ५८४ ।

**झाणसंवरजोगे**–ध्यानमेव संवरयोगः ध्यानसंवरयोगः । द्वात्रिंशद्योगसङ्ग्रहेऽष्टाविंशतितमो योगः । आव० ६६४ ।

**झात्कारं**–झल्लरीशब्दः । नंदी० १७१ ।

**झायं**–ध्यायं–स्वाध्यायम् । बृ० द्वि० १४५ । आ ।

**झाम**–ध्यामं–दग्धच्छायम् । जीवा० ११४ । दग्धम् । आचा० ३२२ । ध्यामः–अनुज्ज्वलच्छायः । प्रश्न० ४१ ।

**झामलं**–ध्यामलम् । आव० १४६ ।

**झामवन्ना**–ध्यामवर्णाः–अनुज्ज्वलवर्णाः । भग० ३०८ ।

**झामिअं**–ध्मातम् । आव० ६१ ।

**झामिता**–दग्धा । आव० ३४५ ।

**झामिया**–दड्ढा । नि० चू० द्वि० ११० अ । ध्माता–दग्धा । उत्त० १५० ।

**झामेह**–ध्मापयत–स्ववर्णत्याजनेन वर्णान्तरमापादयत । अग्निसंस्कृतानि कुरुत । जं० प्र० १६२ ।

**झावण**–ध्मापनं–दाहः–भस्मसात्करणमिन्धनैः । आचा० ६१ ।

**झावणया**–प्रदीपनकम् । ओघ० ११२ ।

**झावणा**–ध्मापना–अग्निसंस्कारः । आव० १२६ ।

**झिखिता**–झिखित्वा–प्रभाष्य । आव० ५५ ।

**झिंगिरा**–त्रीन्द्रियजन्तुविशेषः । प्रज्ञा० ४२ । जीवा० ३२ ।

**झिंगिरिडा**–चतुरिन्द्रियजन्तुविशेषः । जीवा० ३२ ।

**झिंझिए**–बुभुक्षार्त्तः । बृ० तृ० १५६ आ ।

**झिज्जिए**–क्षितः क्षीणशरीरः । जीवा० १२२ ।

**झिज्झिरिपलंबं**– । आचा० ३४८ ।

**झिज्झिरी**–वल्लीपलाशः । आचा० ३४८ ।

**झिमियं**–जाड्यता सर्वशरीरावयवानामवशित्वमिति । आचा० २३५ ।

**झियाइ**–ध्यायति–चिन्तयति । भग० १७५ ।

**झियायंति**–ध्यायन्ति इन्धनैर्दीप्यन्त इति । ठाणा० ४२० ।

**झियायमाण**–ध्यायमानः, ध्मायन् वा दह्यमान इत्यर्थः । भग० १२२ ।

**झिल्लिया**–त्रीन्द्रियजन्तुविशेषः । प्रज्ञा० ४२ । जीवा० ३२ ।

**झिल्लिरी**–मत्स्यबन्धनविशेषः । विपा० ८१ ।

**झिल्ली**–झिल्लिका–वनस्पतिविशेषरूपा । प्रज्ञा० ३७ ।

**झुंझिय**–बुभुक्षितः । प्रश्न० ५२ ।

**झुषिर**– । आचा० ३०७ ।

**झुसिर**–झुषेः शोषस्य दानात् शुषिरम् । भग० ७७६ । शुषिरम् । आव० ६२५ । शुषिरं–शुषिरशतकलितम् । जीवा० ११४ । वादित्रविशेषः । जं० प्र० ४१२ । शुषिरं–अन्तःसाररहितम् । दश० १७५ । पलालादिच्छन्नम् । ओघ० १२३ । शुषिरं वंशादिकम् । भग० २१७ । शुषिरः–असारकायः । प्रश्न० ४१ । शुषिरं-वंशादिकम् । जं० प्र० १०२ । शुषिरः । ग० ।

**झूसणं**–जोषणं–सेवनम् । आव० ८४० ।

**झूसणा**–जोषणा–सेवणा । उपा० १२ ।

**झूसिए**–जुष्टः–सेवितः । झूषितः–क्षपितः । जं० प्र० २८० ।

**झूसिया**–झूषिताः–क्षीणा वा । जुष्टाः सेविताः । औप० ६६ ।

**झोडा**–झोडः–पत्रादिशाटनं, तद्योगात्तेऽपि झोडाः । ज्ञाता० १७३ ।

**झोषः**–इह तीर्थे षण्मासान्तमेव तपस्ततः षण्णां मासाना-मुपरि यान् मासानापन्नोऽपराधी तेषां क्षपणं अनारोपणं, प्रस्थे चतुःसेतिकाऽतिरिक्तधान्यस्येव झाटनमित्यर्थः । ठाणा० ३२५ ।

**झोसित्ता**–क्षपयित्वा । ज्ञाता० ७७ । झोषिताः–क्षपिताः क्षपितदेहाः । ठाणा० ५७ ।

**झोसइ**–झोषयति–शोषयति, क्षयं नयति । आचा० १६२ ।

**झोसणं**–जोषणाः–सेवनाः कारणानि । सम० १२० ।

**झोसमाणे**–झोषयन्–क्षपयन् । आचा० २०४ ।

**झोसिए**–झोषितः–क्षपितः । आचा० २०६ ।

**झोसिओ**–सेवितः । आचा० २०६ । क्षपितः । आचा० २२४ ।

**झोसेथ**–गवेषयत(देशी०) । बृ० द्वि० १६२ आ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

आगमवाचनादातृ-बहुश्रुत-युगप्रधानसदृशदेवसूरतपागच्छसमाचारीसंरक्षण-
कटिबद्ध-श्रेष्ठिदेवचन्द्रलालभाईजैनपुस्तकोद्धारश्रीजैनानन्दपुस्तका-
लयाद्यनेकसंस्थासंस्थापक-अनेकग्रन्थप्रणेतृश्रीवर्धमानजैनागम-
मंदिर(सिद्धक्षेत्र)श्रीवर्धमानजैनताम्रपत्रा-
गममंदिर(सूर्यपुर)संस्थापक-आग-
मोद्धारक-ध्यानस्थ-
स्वर्गत-

आचार्यश्रीआनन्दसागरसूरिसङ्कलितः—

# श्रीअल्पपरिचितसैद्धान्तिकशब्दकोषः

( कतो झपर्यन्तो द्वितीयो विभागः )

श्रेष्ठि-देवचन्द्रलालभाई-जैनपुस्तकोद्धारे ग्रन्थाङ्कः ११५ ॥

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

# શેઠ દેવચંદ લાલભાઇ જૈન પુસ્તકોદ્ધાર ફંડ

ગ્રથાંક　　**હાલમાં મળતા ગ્રન્થો**　　રૂ. આ.

૮૬ લોકપ્રકાશ મૂળ ચોથો વિભાગ ( પ્રત ) ... ... ... ૧–૦
૮૭ ભરતેશ્વરબાહુબલિવૃત્તિ દ્વિતીય વિભાગ સંપૂર્ણ ... ... ... ૨–૦
૮૮ પ્રશમરતિપ્રકરણ–બૃહદ્‌ગચ્છીય શ્રીહરિભદ્રસૂરિકૃત વિવરણ સમેત ... ... ૧–૪
૮૯ અધ્યાત્મકલ્પદ્રુમ, રત્નચંદ્રગણિ–વર્ધનવિજયગણિકૃત ટીકાયુક્ત, ... ... ૩–૦
૯૦ ગૌતમીયકાવ્ય, રૂપચંદ્રગણિકૃતમ્ ... ... ... ૧–૮
૯૧ સટીક વૈરાગ્યશતકાદિ ગ્રંથપંચકમ્ ... ... ... ૧–૦
૯૨ અભિધાનચિન્તામણિકોશ ... ... ... ૪–૦
૯૩ જૈનકુમારસંભવ ... ... ... ૨–૮
૯૪ સિદ્ધહેમશબ્દાનુશાસન બૃહદ્‌વૃત્ત્યવચૂર્ણિનવપાદ, અવચૂર્ણિકાર શ્રીમદ્‌અમરચંદ્ર ... ૫–૦
૯૫ વીતરાગસ્તોત્ર અવચૂર્ણિ વિવરણ અને ભાષાંતર સમેત ... ... ૧–૮
૯૯ શ્રમણસૂત્રાદિ અવચૂરિ ... ... ... ૧–૦
૧૦૦ વંદનપ્રતિક્રમણ અવચૂરિ ... ... ... ૧–૮
ભક્તામરસ્તોત્ર પાદપૂર્તિરૂપ કાવ્ય, પ્રથમ વિભાગ ટીકા ભાષાંતર ... ૩–૦
" " કાવ્ય, બીજો વિભાગ ટીકા ભાષાંતર ... ૩–૮
જીવસમાસપ્રકરણ સટિક ... ... ... ૧–૮
સ્તુતિચતુર્વિંશતિકા સચિત્રા શ્રીશોભનમુનિકૃતા સંસ્કૃતા ... ... ૮–૦
સ્તુતિચતુર્વિંશતિકા સચિત્રા શ્રીબપ્પભટ્ટીસૂરિકૃતા ભાષાંતરયુક્તા ... ... ૬–૦
સ્તુતિચતુર્વિંશતિકા સચિત્રા કવિ ધન[illegible]કૃતા વ. ઐંદ્રસ્તુતિ ... ... ૬–૦
ચતુર્વિંશતિકા જિનાનંદસ્તુતિ સચિત્રા મેરુવિજયકૃતા ભાષાંતર સમેતા ... ૬–૦
નંદ્યાદિગાથાદ્યકારાદિયુતો ( સપ્તસૂત્ર ) વિષયાનુક્રમ ... ... ... ૨–૦
આવશ્યકસૂત્ર મલયગિરિકૃત ટીકાયુક્ત પૂર્વ ભાગ ... ... ... ૪–૦
" બીજો ભાગ ... ... ... ૨–૮
" ત્રીજો ભાગ ( દે. લા. અંક ૮૫ ) ... ... ... ૨–૮
લોકપ્રકાશ પ્રથમ વિભાગ, દ્રવ્યલોક, સર્ગ ૧ થી ૧૧ ભાષાંતર ... ... ૩–૮
" દ્વિતીય વિભાગ, ક્ષેત્રલોક, સર્ગ ૧૨ થી ૨૦ ભાષાંતર ... ... ૩–૮

## • વેચાણમાં નવીન પુસ્તકો •

૧૦૨ શ્રાવકધર્મપંચાશિકા ... ૨–૦
૧૦૩ દશવૈકાલિક અવચૂરિ: ... ૩–૦
૧૦૫ પિંડનિર્યુક્તિ અવચૂરિ ... ૩–૦
૧૦૯ સૂત્રકૃતાંગદીપીકા ... ૩–૦
૧૦૪ ઉત્તરાધ્યયન અવચૂરી ભાગ ૧ ૪–૦
૧૦૬ શ્રાદ્ધવિધિ કૌમુદી ... ૪–૦
શ્રાદ્ધવિધિ મરાઠી સારાંશ ... ૧–૦
૧૦૭ નંદીસૂત્ર અવચૂરી ભાગ ૧ ... પ્રેસમાં
૧૦૮ આવશ્યક અવચૂરી ભાગ ૧ ... "

૧૧૦ સૂત્રકૃતાંગ દીપિકા ભાગ ૨ ... પ્રેસમાં
૧૧૧ જમ્બૂદ્વિપપ્રજ્ઞપ્તિ ચૂર્ણિ ... "
૧૧૨ આવશ્યક અવચૂરી ભાગ ૨ ... "
૧૧૩ નંદીસૂત્ર અવચૂરી ભાગ ૨ ... "
૧૧૪ ઉત્તરાધ્યયન અવચૂરી ભાગ ૨ ... "
૧૧૫ અલ્પપરિચિતસૈદ્ધાન્તિક શબ્દકોષ ૨ "
૧૧૯ જિન ભક્તિ વિધિ વેચાય છે
૧૨૦ આત્મબોધ સજ્ઝાયસંગ્રહ "

આર્ટપ્લેટ તથા પૂંઠું • [illegible] • અમદાવાદ

Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org